# सुन्दरकाण्ड चतुष्पञ्चाशः सर्गः (५४) - लङ्कादहनम्

वीक्षमाणस् ततो लङ्कां कपिः कृत मनोरथः ।
वर्धमान समुत्साहः कार्यशेष मचिन्तयत् ॥ १ ॥

किं नु खल्व वशिष्टं मे कर्तव्य मिह साम्प्रतम् ।
यदेषां रक्षसां भूयः सन्ताप जननं भवेत् ॥ २ ॥

वनं तावत् प्रमथितं प्रकृष्टा राक्षसा हताः ।
बलै कदेशः क्षपितः शेषं दुर्ग विनाशनम् ॥ ३ ॥

दुर्गे विनाशिते कर्म भवेत् सुख परिश्रमम् ।
अल्प यत्नेन कार्येऽस्मिन् मम स्यात् सफलः श्रमः ॥ ४ ॥

यो ह्ययं मम लाङ्गूले दीप्यते हव्य वाहनः ।
अस्य सन्तर्पणं न्याय्यं कर्तुमेभि र्गृहोत्तमैः ॥ ५ ॥

ततः प्रदीप्त लाङ्गूलः सविद्युदिव तोयदः ।
भवनाग्रेषु लङ्काया विचचार महाकपिः ॥ ६ ॥

गृहाद् गृहं राक्षसाना मुद्यानानि च वानरः ।
वीक्षमाणो ह्यसन्त्रस्तः प्रासादांश्च चचार सः ॥ ७ ॥

अवप्लुत्य महावेगः प्रहस्तस्य निवेशनम् ।
अग्निं तत्र स निक्षिप्य श्वसनेन समो बली ॥ ८ ॥

ततोऽन्यत् पुप्लुवे वेश्म महा पार्श्वस्य वीर्यवान् ।
मुमोच हनुमानग्निं कालानल शिखोपमम् ॥ ९ ॥

वज्रदंष्ट्रस्य च तथा पुप्लुवे स महाकपिः ।
शुकस्य च महातेजाः सारणस्य च धीमतः ॥ १० ॥

तथा चेन्द्रजितो वेश्म ददाह हरियूथपः ।
जम्बुमालेः सुमालेश्च ददाह भवनं ततः ॥ ११ ॥

रश्मिकेतोश्च भवनं सूर्य शत्रोस्त थैव च ।
ह्रस्वकर्णस्य दंष्ट्रस्य रोमशस्य च रक्षसः ॥ १२ ॥

युद्धोन् मत्तस्य मत्तस्य ध्वज ग्रीवस्य रक्षसः ।
विद्युज् जिह्वस्य घोरस्य तथा हस्ति  मुखस्य च ॥ १३ ॥

करालस्य पिशाचस्य शोणिताक्षस्य चैव हि ।
कुम्भकर्णस्य भवनं मकराक्षस्य चैव हि ॥ १४ ॥

यज्ञ शत्रोश्च भवनं ब्रह्म शत्रोस् तथैव च ।
नरान्तकस्य कुम्भस्य निकुम्भस्य दुरात्मनः ॥ १५ ॥

वर्जयित्वा महातेजा विभीषण गृहं प्रति ।
क्रममाणः क्रमेणैव ददाह हरिपुङ्गवः ॥ १६ ॥

तेषु तेषु महार्हेषु भवनेषु महायशाः ।
गृहेष् वृद्धिमता मृद्धिं ददाह स महाकपिः ॥ १७ ॥

सर्वेषां समतिक्रम्य राक्षसेन्द्रस्य वीर्यवान् ।
आससादाथ लक्ष्मीवान् रावणस्य निवेशनम् ॥ १८ ॥

ततस् तस्मिन्गृहे मुख्ये नानारत्न विभूषिते ।
मेरु मन्दर सङ्काशे सर्व मङ्गल शोभिते ॥ १९ ॥

प्रदीप्त मग्नि मुत्सृज्य लाङ्गूलाग्रे प्रतिष्ठितम् ।
ननाद हनुमान् वीरो युगान्त जलदो यथा ॥ २० ॥

श्वसनेन च सम्योगा दतिवेगो महाबलः ।
कालाग्निरिव जज्वाल प्रावर्धत हुताशनः ॥ २१ ॥

प्रदीप्त मग्निं पवनस् तेषु वेश्मस्व चारयत् ।
अभूच्छ्वसन सम्योगा दतिवेगो हुताशनः ॥ २२ ॥

तानि काञ्चन जालानि मुक्तामणि मयानि च ।
भवनान् यवशीर्यन्त रत्नवन्ति महान्ति च ॥ २३ ॥

तानि भग्न विमानानि निपेतुर् वसुधातले ।
भवनानीव सिद्धाना मम्बरात् पुण्यसङ्क्ष्ये ॥ २४ ॥

सञ्जज्ञे तुमुलः शब्दो राक्षसानां प्रधावताम् ।
स्वगृहस्य परित्राणे भग्नोत्साहोर् जितश्रियाम् ॥ २५ ॥

नूनमेषोऽग्नि रायातः कपि रूपेण हा इति ।
क्रन्दन्त्यः सहसा पेतुस् स्तनन्धय धराः स्त्रियः ॥ २६ ॥

काश्चिदग्नि परीतेभ्यो हर्म्येभ्यो मुक्त मूर्धजाः ।
पतन्त्यो रेजिरेऽभ्रेभ्यः सौदामिन्य इवाम्बरात् ॥ २७ ॥

वज्र विद्रुम वैडूर्य मुक्ता रजत संहितान् ।
विचित्रान् भवनान् धातून् स्यन्दमानान् ददर्श सः ॥ २८ ॥

नाग्निस् तृप्यति काष्ठानां तृणानां हरियूथपः ।
नाग्नेर् नापि विशस्तानां राक्षसानां वसुन्धरा ॥ २९ ॥

क्वचित् किंशुक सङ्काशाः क्वचिच् छाल्मलि सन्निभाः ।
क्वचित् कुङ्कुम सङ्काशाः शिखा वह्नेश् चकाशिरे ॥ ३० ॥

हनूमता वेगवता वानरेण महात्मना ।
लङ्कापुरं प्रदग्धं तद् रुद्रेण त्रिपुरं यथा ॥ ३१ ॥

ततस्तु लङ्कापुर पर्वताग्रे
समुत्थितो भीम पराक्रमोऽग्निः ।
प्रसार्य चूडावलयं प्रदीप्तो
हनूमता वेगवता विसृष्टः ॥ ३२ ॥

युगान्त कालानल तुल्यवेगः
समारुतोऽग्निर् ववृधे दिविस्पृक् ।
विधूम रश्मिर् भवनेषु सक्तो
रक्षःशरीराज्य समर्पितार्चिः ॥ ३३ ॥

आदित्य कोटी सदृशः सुतेजा
लङ्कां समस्तां परिवार्य तिष्ठन् ।
शब्दै रनेकै रशनि प्ररूढैः
भिन्दन्ति वाण्डं प्रबभौ महाग्निः ॥ ३४ ॥

तत्राम्बरादग्निरतिप्रवृद्धो
रूक्षप्रभः किंशुकपुष्पचूडः ।
निर्वाणधूमाकुलराजयश्च
नीलोत्पलाभाः प्रचकाशिरेऽभ्राः ॥ ३५ ॥

वज्री महेन्द्रस् त्रिदशेश्वरो वा
साक्षाद्यमो वा वरुणोऽनिलो वा ।

रुद्रोऽग्नि रर्को धनदश्च सोमो
न वानरोऽयं स्वयमेव कालः ॥ ३६ ॥

किं ब्रह्मणः सर्व पितामहस्य
सर्वस्य धातुश्  चतुराननस्य ।
इहागतो वानर रूप धारी
रक्षोप संहार करः प्रकोपः ॥ ३७ ॥

किं वैष्णवं वा कपि रूपमेत्य
रक्षो विनाशाय परं सुतेजः ।
अनन्त मव्यक्त मचिन्त्य मेकं
स्वमायया साम्प्रत मागतं वा ॥ ३८ ॥

इत्येव मूचुर् बहवो विशिष्टा
रक्षोगणास् तत्र समेत्य सर्वे ।
सप्राणि सङ्घां सगृहां सवृक्षां
दग्धां पुरीं तां सहसा समीक्ष्य ॥ ३९ ॥

ततस्तु लङ्का सहसा प्रदग्धा
सराक्षसा साश्वरथा सनागा ।
सपक्षिसङ्घा समृगा सवृक्षा
रुरोद दीना तुमुलं सशब्दम् ॥ ४० ॥

हा तात हा पुत्रक कान्त मित्र
हा जीवितं भोगयुतं सुपुण्यम् ।
रक्षोभि रेवं बहुधा ब्रुवद्भिः
शब्दः कृतो घोरतरः सुभीमः ॥ ४१ ॥

हुताशन ज्वाल समावृता सा
हतप्रवीरा परिवृत्त योधा ।
हनूमतः क्रोध बलाभि भूता
बभूव शापोप हतेव लङ्का ॥ ४२ ॥

स सम्भ्रम त्रस्त विषण्ण राक्षसां
समुज्ज्वल ज्वाल हुताश नाङ्किताम् ।
ददर्श लङ्कां हनुमान् महामानाः
स्वयम्भु कोपोप हता मिवावनिम् ॥ ४३ ॥

भङ्क्त्वा वनं पादप रत्न सङ्कुलं
हत्वा तु रक्षांसि महान्ति सम्युगे ।
दग्ध्वा पुरीं तां गृहरत्नमालिनीं
तस्थौ हनूमान् पवनात्मजः कपिः ॥ ४४ ॥

स राक्षसांस् तान् सुबहूंश्च हत्वा
वनं च भङ्क्त्वा बहुपादपं तत् ।
विसृज्य रक्षो भवनेषु चाग्निं
जगाम रामं मनसा महात्मा ॥ ४५ ॥

ततस्तु तं वानर वीर मुख्यं
महाबलं मारुत तुल्यवेगम् ।
महामतिं वायुसुतं वरिष्ठं
प्रतुष्टुवुर् देव गणाश्च सर्वे ॥ ४६ ॥

भङ्क्त्वा वनं महातेजा हत्वा रक्षांसि सम्युगे ।
दग्ध्वा लङ्कापुरीं रम्यां रराज स महाकपिः ॥ ४७ ॥

तत्र देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ।
दृष्ट्वा लङ्कां प्रदग्धां तां विस्मयं परमं गताः ॥ ४८ ॥

तं दृष्ट्वा वानर श्रेष्ठं हनुमन्तं महाकपिम् ।
कालाग्नि रिति सञ्चिन्त्य सर्वभूतानि तत्रसुः ॥ ४९ ॥

देवाश्च सर्वे मुनि पुङ्गवाश्च
गन्धर्व विद्याधर नागयक्षाः ।
भूतानि सर्वाणि महान्ति तत्र
जग्मुः परां प्रीति मतुल्य रूपाम् ॥ ५० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुःपञ्चाशः सर्गः ॥ ५४ ॥